भूमिरञ्जनसङ्काशा धारा चास्य सिता भवेत्।
अञ्जनाख्यमिदं प्रायः सर्व्वदैवोपलभ्यते ॥”
लौहप्रदीपेऽपि।
“धारा शुभ्रा भवेद्यस्य भूमिः कज्जलसन्निभा।
क्षणरङ्गैश्चितं वापि विद्यात् कज्जलवज्रकम्॥२७॥
मधुवर्णसमा भूमिरङ्गं वा मधुबिन्दुवत्।
क्षौद्राख्यमिति जानीयात् जयलक्ष्मीयशःप्रदम्॥”
शार्ङ्गधरेऽपि।
“निम्नकक्षो भवेद्यत्र रात्रिन्दिवविलेपितः।
मधुरो मधुवर्णाभः स खड्गो देववल्लभः॥
विशेषाच्चात्र रज्यन्ति सततं मक्षिकादयः।२८।
आसीमकोणिका यस्य क्षुद्राङ्गं कुण्डलीकृतम्॥
क्षुद्रवज्रकनामानं प्राह नागार्ज्जुनो मुनिः।
इदं कुण्डलवज्रञ्च प्राह लौहार्णवे मुनिः॥
अस्य क्षतेषु बलवान् दाहः समवलोकितः।२९।
यदङ्गं मक्षिकाकारं भूमिश्चैव सितासिता॥
स्नेहः शुष्यति चैवात्र मक्षिकाङ्गं तमादिशेत्।३०।
अङ्गं यदा तुषाकारं या च भूमिः सितासिता॥
तुषवज्रमिदं ख्यातं प्राह नागार्ज्जुनो मुनिः।३१।
अङ्गं यवफलाकारं भूमिः कृष्णा सिता तथा॥
यवाङ्गमिति तं विद्यात्तत्स्पर्शे कण्डूसम्भवः।
एष खड्गाधमस्त्याज्यो यदीच्छेद्भूतिमात्मनः॥३२
अङ्गं व्रीहिप्रसूनाभं भूमिर्धूम्रा क्षतेऽतिरुक्।
तद्व्रीहिवज्रं जानीयाच्छत्रूणां भयवर्द्धनम् ३३॥
अतसीफलसङ्काशमङ्गं भूमिः सितासिता।
अतसीवज्रमाहुस्तं तत्क्षते शिरसो रुजा ३४॥
यदा सर्षपबीजाभमङ्गं भूमिः सितासिता।
खरधारः खरस्पर्शः सर्षपाङ्गः स दुर्लभः॥३५॥
सिंह्याकारं भवेद्यस्य अङ्गं भूमिः सितासिता।
सिंहीवज्रन्तु तद्विद्यात्तत्क्षते प्रलपेन्नरः॥
एतद्धावनतोयेन कासरोगोपनाशनम्॥३६॥
अङ्गं तण्डुलसङ्काशं भूमिर्धूम्रा सितासिता।
तण्डुलाङ्गमिमं विद्याद्यशःश्रीबलवर्द्धनम्।
एतत्पर्य्युषितं तोयं तण्डुलोदकसन्निभम्॥
अस्य प्रभावान्मनुजो भर्त्तां हि लभते श्रियम्॥३७
अङ्गञ्चेन्नोक्षुराकारं भूमिराघातनिःसहा॥
खड्गाधममिदं विद्यान्नोवज्रं नाम नामतः॥३८॥
स्थूला दीर्घाः शिराः कृष्णा भूमिश्चैव सिता-
सिता॥
शिराङ्गमिति तं ब्रूयादेनं खड्गाधमं बुधाः।३९।
शिवलिङ्गाकृतिश्चाङ्गे धारा चैव सिताथवा॥
शिवाङ्गमिति तं ब्रूयाच्छत्रुपक्षनिसूदनम्॥४०॥
यदा व्याघ्रनखाकारमङ्गं भूमिस्तु पिङ्गला॥
नखवज्रमिदं ब्रूयात्तत्क्षते श्वयथुर्भवेत्।
एतदामिषसंस्पर्शात् प्रविशेत् स्वयमेव हि॥४१॥
ग्राहपुच्छोपमन्त्वङ्गं भूमिर्धूम्रा खराकृतिः।
ग्राहाङ्गमिति जानीयाच्छत्रुवंशोपनाशनम्॥
अस्य स्पर्शनमात्रेण जीवन्मत्स्या जहत्यसून्॥४२॥
यदा मनुजनेत्राभमङ्गं भूमिः सितासिता॥
नेत्राङ्गमिति जानीयात् संग्रामे विजयप्रदम्।
तरक्षावनतोयेन नरमत्तोऽपि पश्यति॥४३॥
अङ्गं केशसमं यस्य भूमिर्धूम्रा सितासिता।
केशाङ्गमिति जानीयात् क्लेशदुःखभयापहम्॥४४॥
निरङ्गं स्थूलप्रकृतिसुपलाङ्गं विदुर्बुधाः।
एतद्धि प्रायशो लोके दृश्यते द्विजसत्तम!॥”४५
पद्मपुराणस्य।
“निरङ्गा निशिता धारा शाणे वह्निं वमत्यपि।
द्रोणीवज्रमिदं ज्ञेयं पृथिव्यां नातिदुर्लभम्॥४६॥
अङ्गं काकपदाकारं भूमिराघातनिःसहा।
एष खड्गाधमस्त्याज्यो काकाङ्गो भूति-
मिच्छता॥४७॥
यदा कपालमङ्गेषु दृश्यते स्पर्शतः खरम्।
एतद्धि दुःखजनकं कपालाङ्गं बुधस्त्यजेत्॥४८॥
तन्वीपत्रा वलाङ्का या सुवर्णाङ्गासिपुत्त्रिका।
पत्रवज्रकमाहुस्तं आयुर्व्वेदविदो जनाः॥”
लौहार्णवेऽपि।
“सुपर्णसन्निभा भूमिरङ्गं कालं प्रतीयते।
तत् पत्रवज्रं काकस्य सुपर्णमुपजायते॥४९॥
तुवरीदलसङ्काशमङ्गं यस्मिन् प्रतीयते।
तुवरीवज्रमाहुस्तं तत्क्षते शिरसो भ्रमः॥
एष खड्गाधमस्त्याज्यो यदीच्छेज्जीवनं निजम्॥
५०॥
विम्बीदलसमा भूमिरङ्गं विम्बीफलोपमम्॥
विम्बीवज्रन्तु तद्विद्यात्तज्जलं तिक्तमुच्यते।
पित्तश्लेष्मविकाराणां प्रशमाय प्रयुज्यते॥५१॥
प्रियङ्गुसदृशन्त्वङ्गं भूमिश्च कपिलाकृतिः।
फलवज्रमिदं प्रोक्तं शाणे धूम्रं वमत्यपि॥५२॥
अङ्गं सर्षपपुष्पाभं भूमिश्चैव सितासिता।
एतत् सर्षपवज्रं स्यात् शाणे वह्निं वमत्यपि॥
अपि कुण्डलिकां याति एतदत्यन्तकोमलम्।
एतत्प्रसादात् क्षितिपः कृत्स्नां साधयते महीम्॥
५३॥
नीलीरससमा भूमिरङ्गं नीलीतरङ्गवत्।
नीलीवज्रमिदं दृष्टं शाणे वह्निशिखां वमेत्॥
एष खड्गवरो नृणामरिष्टभयनाशनः॥५४॥
रक्ताश्लिष्टो महारेखा भूमिश्चैव सितासिता॥
रक्ताङ्गमिति जानीयाद्वैरिपक्षविनाशनम्।
शाणेन यस्तु रक्तां वा नीलां वा वमते शिखाम्॥
रक्तस्पर्शनमात्रेण स्वयमेव निकृन्तति।
क्षतेऽस्य रक्तश्वयथुस्तृषा दाहश्च जायते॥५५॥
अङ्गं वचादलसमं भूमिश्चैव सितासिता।
वचावज्रमिदं ज्ञेयं तत्क्षताद्विषनाशनम्॥
एष खड्गवरो राज्ञा साधनीयः प्रयत्नतः॥५६॥
रसोनादुत्तमं ह्यङ्गं भूमिस्तस्य दलोपमा॥
रसोनवज्रं जानीयात् शाणे वह्निं वमत्यपि।
अस्य धावनतोयेन आमवातविनाशनम्॥५७॥
निरङ्गा निर्म्मला भूमिर्धारा तीक्ष्णा खरः स्वरः।
सुमनावज्रमेतत् स्याद्भुवि नात्यन्तदुर्लभम्॥५८॥
मञ्जिष्ठासदृशा दीर्घास्तन्वशो रेखाः सुविस्तराः।
जिङ्गीवज्रमिदं नाम सर्व्वकामार्थसाधनम्॥५९॥
अङ्गं शमीपत्रसमं भूमिर्धूम्रा सितासिता।
शमीवज्रमिदं ज्ञेयं शनैश्चरसुदावहम्॥
शाणेषु वमते वह्निं सहते वह्निपीड़नम्॥६०॥
रोहितवल्कलसदृशमङ्गं भूमिः सितासिता वापि।
धूम्रा गम्भीरस्वरयुक्तं धारा तीक्ष्णा सिता
भवेद्रेखा॥
रोहिताख्यमिदं वज्रं सर्व्वारिष्टविनाशनम्।
वह्निसंस्पर्शमात्रेण किञ्चिच्चिमिचिमायते।
इत्ययं दुर्लभः खड्गो देवानामपि कथ्यते॥६१॥
शफरीवल्कलाकारमङ्गं भूमिः सितासिता।
प्रोष्ठीवज्रमिदं प्रोक्तं न्यस्तं तरति वारिणि॥
एष खड्गोत्तमो राज्ञां विपक्षकुलनाशकः।
कदाचिल्लभ्यते भाग्यैर्लभ्यते लभ्यते मही॥६२॥
अङ्गं मारिषपत्राभं भूमिः स्याद्विषमच्छविः।
इत्ययं मारिषाङ्गः स्यात् पृथिव्यां नातिदुर्लभः॥
६३॥
भृङ्गराजस्य पुष्पाभमङ्गं भूमिर्हलप्रभा।
आघातं सहते नैव एष खड्गाधमो मतः॥६४॥
धारा तीक्ष्णा खुराकारा भूमिरङ्गविवर्ज्जिता।
आघातं सहते घोरं शाणे वह्निं वमत्यपि।
खुराङ्गमिति जानीयात् पृथिव्यां नातिदुर्ल-
भम्॥६५॥
निर्मला समला भूमिर्भवेच्चैव कदा कदा।
मन्दा तीव्रा भवेद्धारा तड़िद्वज्रस्य लक्षणम्॥६६॥
नीलाञ्जनसमा भूमिरङ्गं जलतरङ्गवत्।
मेघाङ्गमिति जानीयाच्छाणे शीतं भवत्यपि॥
एष खड्गाधमस्त्याज्यो यदीच्छेद्भूतिमात्मनः।
भर्त्तुः प्रतापं शमयेद्रविबिम्बं यथा घनः॥६७॥
मन्दा धारा भृशं गाढ़ा भूमिरङ्गविवर्ज्जिता।
पर्व्वताङ्गमिदं नाम सर्व्वत्रैवोपलभ्यते॥६८॥
अङ्गं गुञ्जाफलसमं भूमिर्म्मीनदलोपमा।
गुञ्जावज्रमिदं दृष्टं तप्तं भवति घर्षणे॥
शाणे सिन्दूरसङ्काशं रजो वमति चासकृत्।
एष खड्गवरो राज्ञा भाग्यादेवोपयुज्यते॥
अस्य प्रभावात्तन्नास्ति यन्न साधयते नृपः॥६९॥
अङ्गं तनुशराकारं भूमिश्चैव सितासिता।
धारा तीक्ष्णा वमति च शाणे वह्निसमाः
शिखाः।
शरवज्रमिदं ज्ञेयं राज्ञां वाञ्छितसिद्धये॥७०॥
दूर्व्वादलनिभा भूमिर्धारा तीक्ष्णा खरः स्वरः।
शाणेन वमते वह्निं दूर्व्वावज्रं सुदुर्लभम्॥७१॥
अङ्गं विल्वदलाकारं भूमिश्चैव सितासिता।
विल्ववज्रमिदं शाणे नीलपीते वमेच्छिखे॥
एष खड्गवरः प्रोक्तः शत्रूणां कुलनाशनः॥७२॥
मसूरदलसङ्काशा भूमिरङ्गं मसूरवत्।
मसूराङ्गमिदं शाणे रजो वमति चारुणम्॥७३॥
शोणपुष्पनिभा रेखा दीर्घा भूमिः सितेतरा।
शोणाङ्गमिति जानीयात् खड्गं परमदुर्ल-
भम्॥७४॥
शटीदलसमा भूमिरङ्गं तत्कुसुमोपमम्।
शटीवज्रमिदं प्रायो लभ्यते गुणवत्तरम्॥७५॥
मार्ज्जाररोमसदृशमङ्गं भूमिः सितेतरा।
मार्ज्जाराङ्गमिदं नाम्ना रोगशोकभयावहम्।
एष खड्गाधमस्त्याज्यो यदीच्छेद्भूतिमात्मनः॥
७६॥
केतकीपत्रसदृशमङ्गं यस्मिन् प्रतीयते।